## आतः । (११०/२२२७)

सिज्ग्रहणमनुवर्तते । सिच आकारान्ताच्च [1]परस्य झेः जुसादेशो भवति । [2]कथमाभ्यामानन्तर्यम् ? सिचो लुकि कृते प्रत्ययलक्षणेन सिचोऽनन्तरः, श्रुत्या [3]चाकारान्तादिति । अदुः । अधुः । अस्थुः[4] । तकारो मुखसुखार्थः । पूर्वेणैव सिद्धे नियमार्थं वचनम्, आत एव सिज्लुगन्तात्, नान्यस्मात् इति । अभूवन्[5] । प्रत्ययलक्षणेन [6]जुस् प्राप्तः प्रतिषिध्यते, तुल्यजातीयापेक्षत्वान् नियमस्य । श्रूयमाणे हि [7]सिचि भवत्येव, [8]अकार्षुः, अहार्षुः ॥

## लङः शाकटायनस्यैव । (१११/२४६३)

[9]आतः इत्येव । आकारान्तादुत्तरस्य लङादेशस्य झेः जुस् आदेशो भवति शाकटायनस्याचार्यस्य मतेन । अयुः । [10]अवुः । अन्येषां मते – अयान्[11] ।

ननु[12] ङितः [13]इत्यनुवर्तते । [14]अत्र लङेवाकारान्तादनन्तरो ङित् सम्भवति नान्यः, तत् किं लङ्ग्रहणेन ? एवं तर्हि लङेव यो लङ विहितः तस्य यथा स्यात्, लङ्वद्भावेन यस्तस्य मा भूत्, 'लोटो लङ्वत्' (३.४.८५/२१९८) इति । यान्तु । वान्तु । 'सिजभ्यस्तविदिभ्यश्च' (३.४.१०९/२२२६) इत्ययमपि झेर्जुस् लोटो न भवति । बिभ्यतु । जाग्रतु । विदन्तु । जुस्भावमात्रं हि मुख्येन लङा विशेष्यते । एवकार उत्तरार्थः ॥

## द्विषश्च । (११२/२४३५)

[15]लङः शाकटायनस्य (३.४.१११/२४६३) [16]इत्येव । द्विषः परस्य लङादेशस्य झेर्जुसादेशो भवति, शाकटायनस्याचार्यस्य मतेन । अद्विषुः । अन्येषां [17]मते – अद्विषन् ॥

## तिङ्शित्सार्वधातुकम् । (११३/२१६६)

[18]तिङः शितश्च प्रत्ययाः सार्वधातुकसञ्ज्ञा भवन्ति । [19]भवति । नयति । स्वपिति । रोदिति । पचमानः । यजमानः । सार्वधातुकप्रदेशाः – 'सार्वधातुके यक्' (३.१.६७/२७५६) इत्येवमादयः ॥

## आर्धधातुकं शेषः । (११४/२१८७)

तिङः शितश्च वर्जयित्वा अन्यः [20]प्रत्ययः [21]शेषो धातुसंशब्दनेन विहितः आर्धधातुकसञ्ज्ञो भवति । लविता । लवितुम् । [22]लवितव्यम् । 'धातोः' (३.१.९१/२८२९) इत्येव । वृक्षत्वम्[23] । वृक्षता [24]अस्ति । [25]लूभ्याम् । लूभिः । जुगुप्सते ॥

---

1. परस्य नास्ति ब. 2. कथं द्वाभ्यामाभ्याम् फ. 3. चकारान्तरात् फ. 4. अपुः अरुः अलुः इत्यधिकम् क. 5. इति इत्यधिकम् फ. 6. जुसि च प्राप्ते ब. 7. सिच् फ. 8. अकार्षुः नास्ति ब. 9. वाक्यमिदं नास्ति फ. 10. अवुः नास्ति फ. 11. अवान् इत्यधिकम् फ, अख्यान् इत्यधिकम् फ. 12. च इत्यधिकम् ब. फ. 13. इत्येव फ. 14. तत्र फ. 15. लङः शाकटायनस्याचार्यस्य मतेन फ. 16. इत्यनुवर्तते ब. 17. तु इत्यधिकम् क, मते नास्ति ब. 18. तिङ् ब. 19. तरति इत्यधिकम् ब. फ. ह. 20. धातुविहितः इत्यधिकम् फ. 21. स इत्यधिकम् अ. 22. लवितव्यम् नास्ति फ. 23. लघुत्वम् इत्यधिकम् फ. 24. अस्ति नास्ति ब. 25. भूभ्याम् भूभिः अ. क.